श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री उज्ज्वलवेङ्कटनाथस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री उज्ज्वलवेङ्कटनाथस्तोत्रम् ॥

रङ्गे तुङ्गे कवेराचलजकनकनद्यन्तरङ्गे भुजङ्गे
शेषे शेषे विचिन्वन् जगदवननयं भात्यशेषेऽपि दोषे।
निद्रामुद्रां दधानो निखिलजनगुणध्यानसान्द्रामतन्द्रां
चिन्तां यां तां वृषाद्रौ विरचयसि रमाकान्त कान्तां शुभान्ताम् ॥ 1 ॥

तां चिन्तां रङ्गक्लृप्तां वृषगिरिशिखरे सार्थयन् रङ्गनाथ
श्रीवत्सं वा विभूषां व्रणकिणमहिराड्सूरिक्लृप्तापराधम्।
धृत्वा वात्सल्यमत्युज्ज्वलयितुमवने सत्क्रतौ बद्धदीक्षो
बध्नन्स्वीयाङ्घ्रियूपे निखिलनरपशून् गौणरज्ज्वाऽसि यज्वा ॥ 2 ॥

ज्वालारावप्रनष्टासुरनिवहमहाश्रीरथाङ्गाब्जहस्तं
श्रीरङ्गे चिन्तितार्थान्निजजनविषये योक्तुकामं तदर्हान्।
द्रष्टुं दृष्ट्या समन्ताज्जगति वृषगिरेस्तुङ्गशृङ्गाधिरूढं
दुष्टादुष्टानवन्तं निरुपधिकृपया श्रीनिवासं भजेऽन्तः ॥ 3 ॥

अन्तः कान्तश्श्रियो नस्सकरुणविलसद्दृक्तरङ्गैरपाङ्गैः
सिञ्चन्मुञ्चन्कृपाम्भः कणगणभरितान्प्रेमपूरानपारान्।
रूपं चापादचूडं विशदमुपनयन् पङ्कजाक्षं समक्षं
धत्तां हृत्तापशान्त्यै शिशिरमृदुलतानिर्जिताब्जे पदाब्जे ॥ 4 ॥

अब्जेन सदृशि सन्ततमिन्धे हृत्पुण्डरीककुण्डे यः।
जडिमार्त आश्रयेऽद्भुतपावकमेतं निरिन्धनं ज्वलितम् ॥ 5 ॥

ज्वलितनानानागशृङ्गगमणिगणोदितसुपरभागक
 घननिभाभाभासुराङ्गक वृषगिरीश्वर वितर शं मम।
सुजनतातातायिताखिलहितसुशीतलगुणगणालय
 विसृमरारारादुदित्वररिपुभयङ्करकरसुदर्शन ॥ 6 ॥

सकलपापापारभीकरघनरवाकरसुदर सादरम्
 अवतु मामामाघसम्भृतमगणनोचितगुण रमेश्वर।
तव कृपा पापाटवीहतिदवहुताशनसमहिमा ध्रुवम्
 इतरथाथाथारमस्त्यघगणविमोचनमिह न किञ्चन ॥ 7 ॥

नगधराराराधने तव वृषगिरीश्वर य इह सादर -
 रचितनानानामकौसुमतरुलसन्निजवनविभागज।
सुमकृतां तां तां शुभस्त्रजमुपहरन् सुखमहिपतिर्गुरुः
 अतिरयायायासदायकभवभयानकशठरिपोः किल ॥ 8 ॥

निगमगा गा गायता यतिपरिबृढेन तु रचय पूरुष
 जितसभो भो भोगिराङ्गिरिपतिपदार्चनमिति नियोजितः।
इह परं रम्रम्यते स्म च तदुदितव्रणचुबुकभूषणे
 इह रमे मे मेघरोचिषि भवति हारिणि हृदयरङ्गग ॥ 9 ॥

गतभये ये ये पदे तव रुचियुता भुवि वृषगिरीश्वर
 विदधते ते ते पदार्चनमितरथा गतिविरहिता इति।
मतिमता तातायिते त्वयि शरणतां हृदि कलयता परि -
 चरणया यायाऽऽयता तव फणिगणाधिपगुरुवरेण तु ॥ 10 ॥

विरचितां तान्तां वनावलिमुपगते त्वयि विहरति द्रुम -
 नहनगाङ्गां गामिव श्रियमरचयत्तव स गुरुरस्य च।
तदनु तान्तां तां रमां परिजनगिरा द्रुतमवयतो निज -
 शिशुदशाशाशालिनीमपि वितरतो वर वितर शं मम ॥ 11 ॥

ममतया यायाऽऽविला मतिरुदयते मम सपदि तां हर
    करुणया याया शुभा मम वितर तामयि वृषगिरीश्वर।
सदुदयायायासमृच्छसि न दरमप्यरिविदलनादिषु
    मदुदयायायासमीप्ससि न तु कथं मम रिपुजयाय च॥ **12** ॥

मयि दयाया यासि केन तु न पदतां ननु निगद तन्मम
    मम विभो भो भोगिनायकशयन मे मतमरिजयं दिश।
परम याया या दया तव निरवधिं मयि झटिति तामयि
    सुमहिमा मा माधव क्षतिमुपगमत्तव मम कृतेऽनघ॥ **13** ॥

घटितपापापारदुर्भटपटलदुर्घटनिधनकारण
    रणधरारारात्पलायननिजनिदर्शितबहुबलायन।
दरवरारारावनाशन मधुविनाशन मम मनोधन
    रिपुलयायायाहि पाहि न इदमरं मम कलय पावन॥ **14** ॥

सुतरसासासारदृक्ततिरतिशुभा तव निपततान्मयि
    सहरमो मोमोत्तु सन्ततमयि भवान्मयि वृषगिरावपि।
प्रतिदिनं नन्नम्यते मम मन उपेक्षिततदपरं त्वयि
    तदरिपापापासनं कुरु वृषगिरीश्वर सततमुज्ज्वल॥ **15** ॥

उज्ज्वलवेङ्कटनाथस्तोत्रं पठतां ध्रुवाऽरिविजयश्रीः।
श्रीरङ्गोक्तं लसति यदमृतं सारज्ञहृदयसारङ्गे॥ **16** ॥

॥ इति श्री उज्ज्वलवेङ्कटनाथस्तोत्रं समाप्तम्॥